# Shri Ganesha Stuti Sasarvasvanandakrita

# સસર્વસ્વાનન્દકૃતા શ્રીગણેશસ્તુતિઃ

## Document Information

Text title : Shri Ganesha Stuti Sasarvasvanandakrita

File name : gaNeshastutiHsasarvasvAnandakRRitA.itx

Category : ganesha, mudgalapurANa, stuti

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM navamaH khaNDaH | adhyAyaH 2 | 9.2 21-54||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 5, 2024

*sanskritdocuments.org*

# સસર્વસ્વાનન્દકૃતા શ્રીગણેશસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥
સસર્વસ્વાનન્દ ઉવાચ ।
અજં પુરાણં પરમવ્યયં તં નિવૃત્તિમાત્રં હ્યસમાધિસંસ્થમ્ ।
અયોગરૂપં ગણનાથમાદ્યં નમામિ નિર્માયિકમપ્રમેયમ્ ॥ ૨૧॥
ન જારજં સ્વેદજમણ્ડજં ન ન ચોદ્ભિદં સ્થાવરજઙ્ગમં ન ।
અનાદિમધ્યાન્તમમોઘરૂપં નમામિ નિર્માયિકમપ્રમેયમ્ ॥ ૨૨॥
ન ભૂસ્વરૂપં ન જલં પ્રકાશં ન વાયુરૂપં ન ખમેવ ઢુણ્ઢિમ્ ।
ન રાજસં સત્ત્વતમોયુતં ન નમામિ નિર્માયિકમપ્રમેયમ્ ॥ ૨૩॥
ન જાગૃતં સ્વપ્નગતં ન દેવં સૌષુપ્તકં નૈવ તુરીયસંસ્થમ્ ।
ન બિન્દુમાત્રં ન ચ સોઽહમેવ નમામિ નિર્માયિકમપ્રમેયમ્ ॥ ૨૪॥
ન બોધગં નૈવ વિબોધરૂપં ન મોહયુક્તં ન ચ મોહહીનમ્ ।
ન નિર્ગુણં નો સગુણં તથા તં નમામિ નિર્માયિકમપ્રમેયમ્ ॥ ૨૫॥
ન કર્મરૂપં ન ચ જ્ઞાનરૂપં સમં ન ચાધીનતમં સદા ન ।
ન સ્વાત્મગં સર્વવિકારહીનં નમામિ નિર્માયિકમપ્રમેયમ્ ॥ ૨૬॥
અસત્સ્વરૂપં ન ચ સત્સ્વરૂપં સમાનરૂપં ન ચ નેતિગં તમ્ ।
નિજાત્મરૂપં વિવિધેષુ નૈવ નમામિ નિર્માયિકમપ્રમેયમ્ ॥ ૨૭॥
અનન્તરૂપં ન તથૈકરૂપં સમં ન તુર્યં ન ચ પઞ્ચમં તમ્ ।
સદા ગણેશાકૃતિરૂપધારં નમામિ નિર્માયિકમપ્રમેયમ્ ॥ ૨૮॥
ન ચાગતં નૈવ ગતં ગણેશમયોગરૂપં પ્રવદન્તિ વેદાઃ ।
સદા નિવૃત્તિમયમાસમન્તાન્નમામિ નિર્માયિકમપ્રમેયમ્ ॥ ૨૯॥
વચોભિરારાત્ કથિતું કદાચિદયોગભાવાન્ મનસો ન શક્યમ્ ।
કદા તમપ્રાપ્ય વદામિ દેવં નમામિ નિર્માયિકમપ્રમેયમ્ ॥ ૩૦॥
ન સિદ્ધિયુક્તં ન ચ બુદ્ધિયુક્તં ન માયિકં બ્રહ્મમયં પરેશમ્ ।
અનન્તપારં ગજવક્ત્રધારં નમામિ નિર્માયિકમપ્રમેયમ્ ॥ ૩૧॥
ત્રિનેત્રધારં ગજવક્ત્રયુક્તં ચતુર્ભુજં ચૈકરદં મહાન્તમ્ ।

મહોદરં વાહનહીનગં તં નમામિ નિર્માયિકમપ્રમેયમ્ ॥ ૩૨॥
ન યોગનિષ્ઠં ન વિહારયુક્તં નિજાત્મનામ્નિ નગરે ન સંસ્થમ્ ।
નિજે સમુદ્રે ન વિહારકારં નમામિ નિર્માયિકમપ્રમેયમ્ ॥ ૩૩॥
ન ભક્તભક્તિપ્રિયમેવ દેવં તથાપિ યોગેન નિવૃત્તિદં તમ્ ।
અપારમાયામયપાશહારં નમામિ નિર્માયિકમપ્રમેયમ્ ॥ ૩૪॥
અહં વિકારેણ વિમોહિતોઽતો ભ્રમન્ ગણેશાધિપતે મહાત્મન્ ।
જગત્સુ નાનાવિધબ્રહ્મસુ પ્રભો નમામિ નિર્માયિકમપ્રમેયમ્ ॥ ૩૫॥
સમાધિરૂપોઽહમચિન્ત્યભાવઃ સર્વાત્મકઃ સર્વવિવર્જિતોઽહમ્ ।
ભ્રમામિ માં રક્ષ નિવૃત્તિદાતર્નમામિ નિર્માયિકમપ્રમેયમ્ ॥ ૩૬॥
સુસિદ્ધિબુદ્ધિપ્રદ મોહયુક્તો વિભજ્ય નાનાવિધમાત્મરૂપમ્ ।
ચતુઃ પદાર્થેષુ ચરામિ ભ્રાન્ત્યા નમામિ નિર્માયિકમપ્રમેયમ્ ॥ ૩૭॥
સુખેલયુક્તોઽહમથો સુખેનેતરેણ યોગેન તદાત્મના વૈ ।
ન શાન્તિજં સૌખ્યમણુ હ્યવિન્દં નમામિ નિર્માયિકમપ્રમેયમ્ ॥ ૩૮॥
અનન્તભાવેન વિમોહિતં માં રક્ષસ્વ તે પાદપ્રિયં ગણેશ ।
નિવૃત્તિકાં દેહિ પરાર્થભૂતાં નમામિ નિર્માયિકમપ્રમેયમ્ ॥ ૩૯॥
નમો ગણેશાય નિવૃત્તિધારિણે નમઃ પરેશાય સુખાબ્ધિવાસિને ।
નમશ્ચ હેરમ્બ મહોદરાય તે નમો નમો બ્રહ્મપતે સુશાન્તયે ॥ ૪૦॥
અયોગરૂપં ગણનાયકં તં પ્રવેશહીનાત્ કથમેવ ઢુણ્ઢે ।
દયાપરં સ્તૌમ્યધુના ચ તારય નમો નમો વિઘ્નપતે નમસ્તે ॥ ૪૧॥
મુદ્ગલ ઉવાચ ।
એવં સ્તુત્વા ગણેશાનં સ્વાનન્દઃ પ્રણનામ તમ્ ।
ભક્ત્યા હર્ષેણ સંયુક્તસ્તમુવાચ ગજાનનઃ ॥ ૪૨॥
(ફલશ્ૃતિઃ ।)
શ્રીગણેશ ઉવાચ ।
વરં વૃણુ મહાભાગ સર્વં દાસ્યામિ ચેપ્સિતમ્ ।
માયામાયિકભેદૈસ્ત્વં દુઃખિતોઽસિ ન સંશયઃ ॥ ૪૩॥
ત્વયા કૃતમિદં સ્તોત્રં સર્વશાન્તિપ્રદં ભવેત્ ।
ન માયાસમ્ભવં દુઃખં પ્રલભેત્ પાઠતો નરઃ ॥ ૪૪॥
યં યમિચ્છતિ તં તં વૈ દાસ્યામિ સ્તોત્રપાઠતઃ ।
અસાધ્યં સાધયેન્ મર્ત્યઃ શ્રવણેન નિજપ્રદમ્ ॥ ૪૫॥
એવં શ્રુત્વા ગણેશસ્ય વચનં સ્વસ્વરૂપકમ્ ।
જગાદ તં પ્રણમ્યાદૌ કૃત્વા કરપુટં વિધે ॥ ૪૬॥

સસર્વસ્વાનન્દ ઉવાચ ।
યદિ તુષ્ટોઽસિ વિઘ્નેશ તદા દેહિ નિવૃત્તિજમ્ ।
સુખં નાન્યં વરં ભ્રાન્તિં માયામેતાં નિવારય ॥ ૪૭॥
તથેતિ તમુવાચૈવ ગણેશોંઽતર્દધે તતઃ ।
સ્વાનન્દઃ ખિન્નભાવેન સ્વસ્થાને સંસ્થિતોઽભવત્ ॥ ૪૮॥
સસ્મારાયોગનાથં તં તતશ્ચિત્રં બભૂવ હ ।
વિશ્વાનિ બ્રહ્મમુખ્યાનિ સ્વાનન્દે લયમાયયુઃ ॥ ૪૯॥
તતઃ સ્વયં નિજાનન્દો નષ્ટસ્તત્ર બભૂવ હ ।
માયાહીનપ્રભાવેણાયોગસ્થઃ શુશુભે મુદા ॥ ૫૦॥
સંયોગમાયયા હીનો ન દદર્શ સ કિઞ્ચન ।
સ્વાત્માનં વાઽપરં મુખ્યં અયોગં ગણનાયકમ્ ॥ ૫૧॥
સર્વબન્ધવિનિર્મુક્તં બભૂવ સ્વસ્વરૂપકમ્ ।
એતત્ સર્વં સમાખ્યાતમયોગસ્ય ચરિત્રકમ્ ॥ ૫૨॥
અયોગે દક્ષ નૈવાસ્તિ ત્વમહં બ્રહ્મ શાશ્વતમ્ ।
ન ગણેશઃ સ્વસંવેદ્યં તેન નિર્વૃત્તિમાપ્નુયાત્ ॥ ૫૩॥
યઃ પઠેચ્છૃણુયાદ્વા યો હ્યયોગસ્ય ચરિત્રકમ્ ।
સ ભુક્ત્વા સકલાન્ ભોગાનન્તે નિર્વૃત્તિમાપ્નુયાત્ ॥ ૫૪॥

ઇતિ સસર્વસ્વાનન્દકૃતા શ્રીગણેશસ્તુતિઃ સમ્પૂર્ણા ॥
એકવિંશતિસ્તોત્રં
- ॥ મુદ્ગલપુરાણં નવમઃ ખણ્ડઃ । અધ્યાયઃ ૨ । ૯.૨ ૨૧-૫૪॥

- .. mudgalapurANaM navamaH khaNDaH . adhyAyaH 2 . 9.2 21-54..

Proofread by Yash Khasbage, Preeti Bhandare

*Shri Ganesha Stuti Sasarvasvanandakrita*
pdf was typeset on June 5, 2024

Please send corrections to *sanskrit@cheerful.com*